॥ শ্ৰী ম্ড়ত্যুঞ্জয মানসিক পূজ স্তোত্ৰম ॥

কৈলাসে কমনীযরত্নখচিতে কল্পদ্ৰুমূলে স্থিতং
করপূরস্ফটিকেন্দুসুন্দরতনুং কাত্যাযনীসেৱিতম্ ।
গঙ্গাতুঙ্গতরঙ্গরঞ্জিতজটাভারং কৃপাসাগরং
কন্ঠালংকৃতশেষভূষণমমুং মৃত্যুঞ্জযং ভাৱযে ॥ ১॥

আগত্য মৃত্যুঞ্জয চন্দ্ৰমৌলে
ৱযাঘ্ৰাজিনালংকৃত শূলপাণে ।
স্ৱভক্তসংরক্ষণকামধেনো
প্ৰসীদ ৱিশ্ৱেশ্ৱর পারৱতীশ ॥ ২॥

ভাস্ৱন্মৌক্তিকতোরণে মরকতস্তম্ভাযুধালংকৃতে
সৌধে ধূপসুৱাসিনে মণিমযে মাণিক্যদীপাঞ্চিতে ।
ব্ৰহেমন্দ্ৰামরযোগিপুঙ্গৱগণৈর্যুক্তে চ কল্পদ্ৰুমৈঃ
শ্ৰীমৃত্যুঞ্জয সুস্থিরো ভৱ ৱিভো মাণিক্যসিংহাসনে ॥ ৩॥

মন্দারমল্লীকরৱীরমাধৱী-
পুন্নাগনীলোত্পলচম্পকান্ৱিতৈঃ ।
করপূরপাটীরসুৱাসিতৈরজলৈ-
রাধত্স্ৱ মৃত্যুঞ্জয পাদ্যমুত্তমম্ ॥ ৪॥

সুগন্ধপুষ্পপ্ৰকরৈঃ সুৱাসিতৈ-
রিৱযন্নদীশীতলৱারিভিঃ শুভৈঃ ।
ত্ৰিলোকনাথারিতহরারঘ্যমাদরা-
দ্গৃহাণ মৃত্যুঞ্জয সরৱৱন্দিত ॥ ৫॥

হিমাম্বুৱাসিতৈস্তোযৈঃ শীতলৈরতিপাৱনৈঃ ।
মৃত্যুঞ্জয মহাদেৱ শুদ্ধাচমনমাচর ॥ ৬॥

গুডদধিসহিতং মধুপ্ৰকীরণং
সুঘৃতসমন্ৱিতধেনুদুগধযুক্তম্ ।

শুভকরমধুপরকমাহর ত্ৰং
ত্রিনযন মৃত্যুহর ত্রিলোকৰন্দ্য ॥ ৭॥

পঞ্চাস্র শান্ত পঞ্চাস্য পঞ্চপাতকসংহর ।
পঞ্চামৃতস্নানমিদং কুরু মৃত্যুঞ্জয প্রভো ॥ ৮॥

জগত্ত্রযীখ্যাত সমস্ততীরথ-
সমাহৃতৈঃ কল্মষহারিভিশ্চ ।
স্নানং সুতোযৈঃ সমুদাচর ত্ৰং
মৃত্যুঞ্জযানন্দগুণাঅভিরাম ॥ ৯॥

আনীতেনাতিশুভ্রেণ কৌশেযেনামরদ্রুমাৎ ।
মারজযামি জটাভারং শিৱ মৃত্যুঞ্জয প্রভো ॥ ১০॥

নানাহেমৱিচিত্রাণি চীরচীনাম্বরাণি চ ।
ৱিৱিধানি চ দিৱযানি মৃত্যুঞ্জয সুধারয ॥ ১১॥

ৱিশিদ্ধমুক্তাফলজালরম্যং
মনোহরং কাঞ্চনহেমসূত্রম্ ।
যজ্ঞোনাপৱীতং পরমং পৱিত্র-
মাধত্স্ৱ মৃত্যুঞ্জয ভক্তিগম্য ॥ ১২॥

শ্রীগন্ধং ঘনসারকুঙকুমযুতং কস্তুরিকাপুরিতং
কালেযেন হিমাম্বুনা ৱিরচিত্তং মন্দারসংৱাসিতম্ ।
দিৱযং দেৱমনোহরং মণিমযে পাত্রে সমারোপিতং
সরৱাঙ্গেষু ৱিলেপযামি সততং মৃত্যুঞ্জয শ্রীৱিভো ॥ ১৩॥

অক্ষতৈরধৱলৈরিদৱৈযঃ সম্যক্তিলসমন্ৱিতৈঃ ।
মৃত্যুঞ্জয মহাদেৱ পুজযামি ৱৃষধৱজ ॥ ১৪॥

চম্পকপঙকজকুন্দৈঃ
করৱীরমল্লিকাকুসুমৈঃ ।

ৰিস্তাৰয নিজমকুটং
মৃত্যুঞ্জয পুণ্ডৰীকনযনাপ্ত ॥ ১৫॥

মাণিক্যপাদুকাদ্ৰন্দ্ৰেৰ মৌনিহৃত্পদ্মমন্দিৰে ।
পাদৌ সদ্পদ্মসদৃশৌ মৃত্যুঞ্জয নিৰেশয ॥ ১৬॥

মাণিক্যকেযুৰকিৰীটহাৰৈঃ
কাঞ্চীমণিস্থাপিতকুদ্মলৈশ্চ ।
মঞ্জীৰমুখ্যাভৰণৈৰমনোজ্ঞৈ-
ৰঙ্গানি মৃত্যুঞ্জয ভূষযামি ॥ ১৭॥

গজৰদনস্কন্দধৃতে-
নাতিস্ৰচ্ছেন চামৰযুগেন ।
গলদলকাননপদ্মং
মৃত্যুঞ্জয ভাৰযামি হৃত্পদ্মে ॥ ১৮॥

মুক্তাতপত্ৰং শশিকোটিশুভ্ৰং
শুভপ্ৰদং কাঞ্চনদণ্ডযুক্তম্ ।
মাণিক্যসংস্থাপিতহেমকুম্ভং
সুৰেশ মৃত্যুঞ্জয তেৰপযামি ॥ ১৯॥

মণিমুকুৰে নিষ্পটলে
ত্ৰিজগদ্গাঢান্ধকাৰসপ্তাশ্বে ।
কন্দৰপকোটীসদৃশং
মৃত্যুঞ্জয পশ্য ৰদনমাত্মীযম্ ॥ ২০॥

কৰপুৰচুৰণং কপিলাজ্যপূতং
দাস্যামি কালেযসমান্ৰিতৈশ্চ ।
সমুদ্ভৰং পাৰনগন্ধধুপিতং
মৃত্যুঞ্জযাঙ্গং পৰিকল্পযামি ॥ ২১॥

ৰৰিতত্ৰযোপেতমখণ্ডদীপত্যা

তমোহরং ব্রাহমমথান্তরং চ ।
সাজ্যং সমস্তামরৰরগহ্দ্যং
সুরেশা   মৃত্যুঞ্জয ৰংশদীপম্ ॥ ২২॥

রাজান্নং মধুরান্ৰিতং চ মৃদুলং মাণিক্যপাত্রে স্থিতং
হিঙ্গুজীরকসন্মরীচমিলিতৈঃ শাকৈরনেকৈঃ শুভৈঃ ।
শাকং সম্যগপূপসূপসহিতং সদ্যোঘৃতেনাপ্লুতং
শ্রীমৃত্যুঞ্জয পারৰতীপ্রিয ৰিভো সাপোশনং ভুজ্যতাম্ ॥ ২৩॥

কুষ্মাণ্ডৰারতাকপটোলিকানাং
ফলানি রম্যাণি চ কারৰল্ল্যা ।
সুপাকযুক্তানি সসৌরভাণি
শ্রীকন্ঠ মৃত্যুঞ্জয ভক্ষযেশ ॥ ২৪॥

শীতলং মধুরং স্ৰচ্ছং পাৰনং ৰাসিতং লঘু ।
মধ্যে স্ৰীকুরু পানীযং শিৰ মৃত্যুঞ্জয প্রভো ॥ ২৫॥

শরকরামিলিতং স্নিগধং দুগধান্নং গোধৃতান্ৰিতম্ ।
কদলীফলসংমিশ্রং ভুজ্যতাং মৃত্যুসংহর ॥ ২৬॥

কেৰলমতিমাধুর্যং
দুগৈধঃ স্নিগৈধশ্চ শরকরামিলিতৈঃ ।
এলামরীচমিলিতং
মৃত্যুঞ্জয দেৰ ভুঙক্ষ্ৰ পরমান্নম্ ॥ ২৭॥

ৰম্ভাচূতকপিত্থকন্ঠকফলৈরদ্রাক্ষারসাস্ৰাদুম-
ত্খরজূরৈরমধুরেক্ষুখণ্ডশকলৈঃ সন্নারিকেলাম্বুভিঃ ।
করপূরেণ সুৰাসিতৈরগুডজলৈরমাধুর্যযুক্তৈরিৰভো
শ্রীমৃত্যুঞ্জয পূরয ত্রিভুৰনাধারং ৰিশালোদরম্ ॥ ২৮॥

মনোজ্ঞৰম্ভাৰনখণ্ডখণ্ডিতা-
ন্রুচিপ্রদান্সরষপজীরকাংশ্চ ।

সসৌরভান্সৈন্ধৰসেৰিতাংশ্চ
গৃহাণ মৃত্যুঞ্জয় লোকৰন্দ্য ॥ ২৯॥

হিঙ্গুজীরকসহিতং
ৰিমলামলকং কপিত্থমতিমধুরম্ ।
ন
বিসখণ্ডাল্লাৰণ্যযুতা-
ন্মৃত্যুঞ্জয় তেরপযামি জগদীশ ॥ ৩০॥

এলাশুন্ঠীসহিতং
দধ্যন্নং চারুহেমপাত্রস্থম্ ।
অমৃতপ্রতিনিধিমাঢ্যং
মৃত্যুঞ্জয় ভুজ্যতাং ত্রিলোকেশ ॥ ৩১॥

জম্বীরনীরাঞ্চিতশৃঙ্গবেরং
মনোহরানম্লশলাটুখণ্ডান্ ।
মৃদুপদংশান্সহিতোপভুঙ্ক্ষৰ
মৃত্যুঞ্জয় শ্রীকরুণাসমুদ্র ॥ ৩২॥

নাগররামঠযুক্তং
সুললিতজম্বীরনীরসংপূরণম্ ।
মথিতং সৈন্দৰসহিতং
পিব হর মৃত্যুঞ্জয় ক্রতুধৰংসিন্ ॥ ৩৩॥

মন্দারহেমাম্বুজগন্ধযুক্তৈ-
রমন্দাকিনীনিরমলপুণ্যতোযৈঃ ।
গৃহাণ মৃত্যুঞ্জয় পূরণকাম
শ্রীমত্পরাপোশনমভ্রকেশ ॥ ৩৪॥

গগনধুনীৰিমলজলৈ-
রমৃত্যুঞ্জয় পদ্মরাগপাত্রগতৈঃ ।
মৃগমদচন্দনপূরণং

প্রক্ষালয চারু হস্তপাদযুগ্মম্ ॥ ৩৫॥

পুন্নাগমল্লিকাকুন্দৰাসিতৈরজাহনৰীজলৈঃ ।
মৃত্যুঞ্জয মহাদেৰ পুনরাচমনং কুরু ॥ ৩৬॥

মৌক্তিকচুরণসমেতৈ-
রমৃগমদঘনসারৰাসিতৈঃ পুগৈঃ ।
পরৈণঃ স্ৰৰণসমানৈ-
রমৃত্যুঞ্জয তেরপযামি তাম্বুলম্ ॥ ৩৭॥

নীরাজনং নিরমলদীপত্মাদিভি-
রদীপাঙকুরৈরুজ্জ্ৰলমুচ্ছ্রিতৈশ্চ ।
ঘণ্টানিনাদেন সমরপযামি
মৃত্যুঞ্জযায ত্রিপুরান্তকায ॥ ৩৮॥

ৰিরিঞ্চিমুখ্যামরৰৃন্দৰন্দিতে
সরোজমত্স্যাঙিকতচক্রচিহিনতে ।
দদামি মৃত্যুঞ্জয পাদপঙকজে
ফণীন্দ্রভূষে পুনররঘ্যমীশ্ৰর ॥ ৩৯॥

পুন্নাগনীলোত্পলকুন্দজাতী-
মন্দারমল্লীকরৰীরপঙকজৈঃ ।
পুষ্পাঞ্জলিং বিল্ৰদলৈস্তুলস্যা
মৃত্যুঞ্জযাঙ্ঘ্রৌ ৰিনিৰেশযামি ॥ ৪০॥

পদে পদে সরৰমনোনিকৃন্দনং
পদে পদে সরৰশুভপ্রদাযকম্ ।
প্রদক্ষিণং ভক্তিযুতেন চেতসা
করোমি মৃত্যুঞ্জয রক্ষ রক্ষ মাম্ ॥ ৪১॥

নমো গৌরীশায স্ফটিকধৰলাঙ্গায চ নমো
নমো লোকেশায স্তুতিৰিবুধলোকায চ নমঃ ।

নমঃ শ্ৰীকণ্ঠায ক্ষপিতপুরদৈত্যায চ নমো
নমঃ ফালাক্ষায স্মরমদৱিনাশায চ নমঃ ॥ ৪২॥

সংসারে জনিতাপরোগসহিতে তপত্ৰযাক্ৰন্দিতে
নিত্যং পুত্ৰকলত্ৰৱিত্তৱিলসত্পাশৈরিনবদ্ধং দৃঢম্ ।
গৰ্ৱান্ধং বহুপাপৱৰ্গসহিতং কারুণ্যদৃষ্ট্যা ৱিভো
শ্ৰীমৃত্যুঞ্জয পাৰ্ৱতীপ্ৰিয সদা মাং পাহি সৰ্ৱেশ্ৱর ॥ ৪৩॥

সৌধে রত্নমযে নৱোত্পলদলাকীৰ্ণে চ তল্পান্তরে
কৌশেযেন মনোহরেণ ধৱলেনাচ্ছাদিতে সৰ্ৱশঃ ।
কৰ্পূরাঞ্চিতদীপদীপ্তিমিলিতে রম্যোপধানদ্ৱযে
পাৰ্ৱত্যাঃ করপদ্মলালিতপদং মৃত্যুঞ্জযং ভাৱযে ॥ ৪৪॥

চতুশ্চত্ৱারিংশদ্ৱিলসদুপচারৈরভিমতৈ-
ৰ্মনঃ পদ্মে ভক্ত্যা বহিরপি চ পূজাং শুভকরীম্ ।
করোতি প্ৰত্যূষে নিশি দিৱসমধ্যেঽপি চ পুমা-
ন্প্ৰযাতি শ্ৰীমৃত্যুঞ্জযপদমনেকাদ্ভুতপদম্ ॥ ৪৫॥

প্ৰাতৰ্লিঙ্গমুমাপতেরহরহঃ সংদৰ্শনাত্স্ৱৰ্গদং
মধ্যাহ্নে হযমেধতুল্যফলদং সাযংতনে মোক্ষদম্ ।
ভানোরস্তমনে প্ৰদোষসমযে পঞ্চাক্ষরারাধনং
তত্কালত্ৰযতুল্যমিষ্টফলদং সদ্যোঽনৱদ্যং দৃঢম্ ॥ ৪৬॥

॥ ইতি শ্ৰীমচ্ছাঙ্করভগৱতঃ কৃতৌ মৃত্যুঞ্জযমানসিকপূজাস্তোত্ৰং সংপূৰ্ণম্ ॥

Send corrections to P. P. Narayanaswami at swami@math.mun.ca